अस्मिन् प्रश्नपत्रपुस्तिकायाम् 28 प्रश्नाः [ खण्ड–क (20) + खण्ड–ख (4+4) ] एवं 8 पृष्ठाः सन्ति ।

Roll No. अनुक्रमांक | | | | | | | | | | | | |

Code No. 51/SS/O/S
कोड नं.

SET/सेट **A**

# संस्कृतम्
# (309)

**Day and Date of Examination**
**(परीक्षादिवसः दिनाङ्कश्च)** ____________________

**Signature of Invigilators** 1. ____________________
**(निरीक्षकहस्ताक्षरद्वयम्)**
2. ____________________

**सामान्य अनुदेशाः :**

**1** परीक्षार्थी प्रश्नपत्रपुस्तिकायाः प्रथमपृष्ठे स्व–अनुक्रमाङ्कम् अवश्यं लिखतु ।

**2** निरीक्ष्यतां यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारं सन्ति न वा इत्यपि निरीक्षणीयम् ।

**3** उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमाङ्कलेखनं सर्वथा वर्जितम् अस्ति ।

**4** स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट(कोड) संख्या **51/SS/O/S, Set-A** अवश्यमेव लेखनीया ।

# संस्कृतम्

# (309)

समय : होरात्रयम् ] [ पूर्णाङ्काः – 100

निर्देशाः – (i) अस्मिन् प्रश्नपत्रे द्वौ खण्डौ स्तः । खण्ड – क (केन्द्रिक पाठ्यक्रमः), खण्ड – ख (वैकल्पिक–I एवं वैकल्पिक–II) स्तः ।

(ii) खण्ड – क अनिवार्यः । अस्मिन् खण्डे 20 प्रश्नाः सन्ति ।

(iii) खण्ड – ख **एकः** एव वैकल्पिकः समाधेयः ।

(iv) खण्ड – क कृते 85 अङ्काः, खण्ड – ख संस्कृतं संस्कृतिश्च अथवा प्रयोजनमूलकसंस्कृतम् इति वैकल्पिकयोः केवलम् एकः एव वैकल्पिकः समाधेयः । अस्य कृते 15 अङ्काः निर्धारिताः ।

## खण्ड – क

## (केन्द्रिक पाठ्यक्रमः)

1 अधोलिखितेषु कस्यचिदेकस्य पाठस्य सारं षड्वाक्येषु लिखत – **6**

(क) परार्थे आत्मोत्सर्गः

(ख) पर्यावरणस्यसंरक्षणम्

(ग) राजते खलु कन्याकुमारी।

2 अधोलिखितं गद्यांशं पठित्वा प्रश्नान् संस्कृतेन उत्तरत – **1×4=4**

अथ तां तथा शप्तां सरस्वतीं दृष्ट्वा शापकलकलं निवार्य पितामहः सुधीरम् उवाच, 'ब्रह्मन् न खलु साधुसेवितोऽयं पन्थाः येनासि प्रवृत्तः। क्षमा हि मूलं सर्वतपसाम्। परदोषदर्शनदक्षा दृष्टि रिव कुपिता बुद्धिः। न आत्मदोषं पश्यति'।

प्रश्ना :

(क) शप्तां सरस्वतीं दृष्ट्वा कः उवाच ?

(ख) क्षमा केषां मूलम् ?

(ग) कुपिता बुद्धिः कीदृशी ?

(घ) कुपिता बुद्धिः किं न पश्यति ?

3 अधोलिखितानां प्रश्नानाम् उचितम् उत्तरम् कोष्ठकात् चित्वा लिखत – 1×4=4

(क) कन्याकुमारी भारतस्य कस्मिन् भागे स्थिता ? (दक्षिणे/पश्चिमे)

(ख) कानि कर्माणि शिष्येण सेवितव्यानि ? (अवधानि/सुचरितानि)

(ग) जीवकः कस्य मस्तिष्कस्य शल्यक्रियाम् अकरोत् ? (सुश्रुतस्य/भोजराजस्य)

(घ) कः दरिद्रः अपिसच्चरित्रवान् आसीत ? (शर्विलकः/चारुदत्तः)

4 (क) रेखाङ्कितपदमाश्रित्य प्रश्ननिर्माणं कुरुत – 1×2=2

(i) द्वीपं परितः सागराणां शोभा अवर्ण नीया भवति।

(ii) आचार्यस्य उपदेशाः उपासितव्याः।

(ख) प्रश्नान् उत्तरत – 1×2=2

(i) दुर्वासाः कस्य मुनेस्तनयः आसीत् ?

(ii) प्रथमः त्वक्प्रत्यारोपकः कः प्रसिद्धः ?

5 एतत् कथनं कः कम्प्रति कथयति ? 2

(क) स्वागतम्, अत्र भवताम्। कुतः समायाताः भवन्तः ?

(ख) महाराज, किम् एकेन फलेन तस्य दारिद्र्यं दूरी भविष्यति ?

6 अधोलिखितपद्यांशद्वयं पठित्वा प्रश्नान् उत्तरत – 2+2=4

(क) को वर्धते विनीतः को वा क्षीयेत यो दृप्तः।
कोन प्रत्येत, को ब्रूते, यश्चानृतं शाश्वत् ॥

**प्रश्नद्वयम् –**

(i) कस्य सदा क्षयः भवति ?

(ii) कः न प्रत्येतव्यः ?

(ख) दिवाकराद्रक्षति योगुहासु, लीनं दिवाभीतमिवान्धकारम्।
क्षुद्रेऽपि नूनं शरणं प्रपन्ने, ममत्वमुच्चैः शिरसां सतीव॥

**प्रश्नद्वयम् –**

(i) अन्धकारं दिवाकरात् कुत्र रक्षति ?

(ii) शरणागतस्य तुच्छजनस्य रक्षकः कः भवति ?

7 अधोलिखितयोः अन्वयद्वयोः रिक्तस्थानपूर्तिं कुरुत – **2**

(क) किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्तमौदार्यम्।

कः पूज्यो विद्वद्भिः स्वभावतः सर्वदा विनीतो यः॥

अन्वय :

शोच्यम् किम् ? कार्पण्यं, विभवे सति किं प्रशस्तम् ? ________, विद्वद्भिः कः पूज्यः ? यः सर्वदा ________ विनीतः।

(ख) दूषितं परदोषैर्हि गृह्णीते योऽन्यथाशुचिम्।

स्वयं सन्दूषितामात्यः क्षिप्रमेव विनश्यति॥

अन्वय :

यः परदोषैः हि दूषितम् अन्यथा ________ सन्दूषित। अमात्यः स्वयं, क्षिपं एव ________।

8 अधोलिखित पद्यांशद्वयस्य भावार्थयोः रिक्तस्थानानि पूरयत – **2**

(क) संतोषामृततृप्तानां यत् सुखंशान्तचेतसाम्।

भावार्थः –

संतोषरुपेण अमृतेन ये ________, ते, एव सुखं प्राप्नुवन्ति।

(ख) स्वयं सन्दूषितामात्यः क्षिप्रम् एव विनश्यति।

भावार्थः –

यस्य, राज्ञः, ________ संदूषिताः, सः राजा विनश्यति।

9 'अ' स्तंभस्य पद्यांशं 'ब' स्तंभेन सह मेलयत – **2**

| **स्तम्भ 'अ'** | **स्तम्भ 'ब'** |
|---|---|
| (i) यः स्वाध्यायमधीते | (क) धर्मस्य त्वरितागतिः |
| (ii) हंसस्यशोभा कावास्ति | (ख) अब्दं विधिना नियतः शुचिः |
| (iii) तं तथा सुकृतं दृष्ट्वा | (ग) सानूनि गन्धः सुरभी करोति |
| (iv) यत्र, सुतक्षीरतया प्रसूतः | (घ) पूज्यमानं स्व कर्मसु |

10 'पतन्ति परपीडकाः' इति नाटकस्य सारांशं षड्वाक्येषु लिखत – सहायतायै बिन्दवः दत्ताः – **6**

**बिन्दवः**

कंसः चाणूरमुष्टिकौ मल्लौ कृष्णं बलरामं च छलेन घातयितुं, आह्वयति युद्धाय प्रेरयति, कृष्णेन सह युद्धे चाणूरः बलरामः च हतवन्तौ कृष्णं कंसं हन्ति वसुदेवः आगत्य कृष्ण बलरामौ स्नेहेन आशीर्वादं यच्छति, सः सत्पुत्रजन्मनः फलं प्राप्तवान्।

**11** अधोलिखितं नाट्यांशद्वेयं पठित्वा प्रश्नान् उत्तरत – **1+1=2**

(क) व्यापारी – महाराज, एकः जीर्णवस्त्रधारी एतत् फलं विक्रीणाति स्म। बहुमूल्यम् अद्‌भुतम् इति च मत्वा तस्मै वस्त्रयुगलं दत्त्वा अत्र आनीतवान्।

राजा – प्रीतोऽस्मि भवतः राजभक्त्या मन्त्रिन्। एनं यथोचितं सत्कृत्य प्रेषयतु। तं लब्ध दत्तं च पुनः आह्वयतु।

मन्त्री – यथाआदिशति भवान्।

राजा – (स्वगतम्) कथं मूर्खः स लब्धदत्तः न अभिजानाति फलस्य दिव्यताम्। (व्यापारी गच्छति, लब्धदत्तः पुनः प्रविशति)।

लब्धदत्तः – जयतु महाराजः, पश्यतु भगवन्। भवतां कृपया अद्य नूतनं वस्त्रयुगलं धारयामि। महान् आनन्दः वर्तते।

राजा – भवान् अल्पसन्तुष्टः लोभरहितः इति दृष्टवा प्रसन्नः अस्मि। पुनः एतत् फलं स्वीकरोतु। भवतः सर्वे मनोरथाः पूर्णाः भविष्यन्ति।

लब्धदत्त – अनुगृहीतोऽस्मि। (फलं गृहीत्वा गच्छति)

प्रश्नाः

(i) व्यापारी किं दत्त्वा फलम् आनीतवान् ?

(ii) लब्धदत्तस्य का विशेषता आसीत् ?

(ख) राजा – यावदहमपि प्रासादमारुह्य चाणूरमुष्टिकयोर्युद्धं पश्यामि। (आरुह्य) मधुरिके विघाटयतां द्वारम्।

प्रतिहारी – यद्‌भर्त्ता आज्ञापयति। (राजा प्रविश्योपविशति) (ततः प्रविशतः चाणूरमुष्टिकौ)

भटः – एष महाराजः। उपसर्पेतां भवन्तौ।

उभौ – (उपेत्य) जयतु भर्ता।

राजा – चाणूरमुष्टिकौ ! सर्वयत्नेन युवाभ्यामानृण्यं कर्त्तव्यम्।

प्रश्नाः **1×2=2**

(i) राजा कुत्र स्थित्वा युद्धं पश्यति ?

(ii) चाणूरमुष्टिकाभ्याम् कस्य आनृण्यं कर्त्तव्यम् ?

**12** अधोलिखितं गद्यांशं पद्यांशं च पठित्वा उभयोः प्रदत्त प्रश्नान् उत्तरत –

(क) गद्यांशः

पक्षिणो वचः श्रुत्वा राजा तत्र नगरे वध्यशिलासमीपे गतः। तत्र ब्राह्मणं निरीक्ष्य, अभयं दत्त्वा, स्वगृहं सम्प्रेष्यच तत्समीपस्थे सरोवरे स्नात्वा वध्यशिलायामुपविष्टः। तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरुषं दृष्ट्वा विश्मितस्तं वदति – भो महासत्त्व, अत्र शिलायां प्रतिदिनं य उपविशति स मदागमनात् पूर्वमेव म्रियते।

**प्रश्नाः –**

(i) राजा कुत्र गतः ? **1**

(ii) शिलायां राजा किं कृत्वा उपविष्टः ? **2**

(iii) शिलायाम् उपविष्टः जनः कीदृशः भवति ? **2**

(ख) पद्यांशः

इन्द्रियाणि प्रसीदन्ति सुत्वग भवति चाननम्।
निद्रालाभः सुखं च स्यान्मूध्नि तैलनिषेवणात्॥

**प्रश्नाः**

(i) कुत्र तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि भवन्ति ? **1**

(ii) आननस्यत्वक् कीदृक् भवति ? **2**

(iii) तैलमर्दनेन अन्यः कः लाभः ? **2**

**13** मंजूषापदसहायतया 'सूर्योदयः' इति विषयमधिकृत्य दशवाक्यानि लिखत – **1×10=10**

| **मञ्जूषा** |
|---|
| रात्रौ गतायां, सूर्योदयः भवति, जनाः शयनात् उत्थाय, स्वकार्येषु व्यापृताः भवन्ति, पक्षिणः अपि भ्रमन्ति, कर्मकराः स्ववृत्तिषु लग्नाः, विद्यार्थिनः, विद्याध्ययनाय प्रवृत्ताः, सर्वे जनाः जीवनवृत्यै उत्साहिताः, उपवनेषु पुष्पाणि पक्षिणः कूजन्ति, लोके नवजीवन समायाति। |

**14** भवान् दिनेशः। वाराणसीस्थितं संस्कृत पुस्तकालयं संस्कृतस्य स्वयंशिक्षण पुस्तकानि प्रेषयितुं पत्रमेकं लिखत। **6**

**15** बालिकानां शिक्षाविषये समाजे आगता जागृति विषये द्वयोर्बालिकयोर्मध्ये संवादमेकं लिखत। चत्वारिवाक्यानि लिखत। **1×4=4**

**16** रेखांकितपदे सन्धिच्छेदं कुरुत – **1**

सुरेन्द्रदत्तै <u>पवनोपनीतैः</u>। <u>सदारिमध्यापि</u> न वैरियुक्ता।

**17** (क) रेखांकितपदे का विभक्तिः किं च मूलपदम् ? **2**

<u>बलाकिनो</u> वारिधरा नदन्तः।

(ख) रेखांकितपदद्वयं लृट्लकारे परिवर्त्य लिखत – **2**

सानूनि गन्धः <u>सुरभीकरोति</u>। रूपं श्रियं स्वामिव <u>दर्शयन्ति</u>।

**18** समुचितपदनिर्माणं कृत्वा रिक्तस्थानं पूरयत – **1×4=4**

(क) कीर्त्तिः ________ सः जीवति। (यत् + उचित विभक्ति)

(ख) दुर्वाससः ________ सरस्वती धरणीतले आगता। (शाप + उचित विभक्ति)

(ग) स्वस्ति एष आगतः ________ अहम्। (अस् + उचित विभक्ति)

(घ) स ________ तैलनिषेवणात् निद्रांलभते। (शिरस् + उचित वि.)

19 यथानिर्दिष्टं कुरुत – 1×4=4

(क) धनोपार्जनाय देशान्तरं प्रस्थिताः। (रेखांकितस्य विग्रहं कुरुत)

(ख) यथा ते वर्तेरन् तथा तेषु वर्तेथाः। (एकम् अव्ययं चिनुत)

(ग) राक्षसः जीवहिंसां त्यजति। (कर्मवाच्ये परिवर्तनं कुरुत)

(घ) ततः सः बहुमूल्यवस्त्रं परिधाय राजसभायाम् आगच्छत्। (प्रत्ययं चिनुत)

20 अधोलिखित वाक्येभ्यः एकम् अव्ययम् एकम् उपसर्गं च चित्वा लिखत – 2

(क) शर्विलकः यदा गृहाभ्यन्तरे प्रविशति तदा तत्र कौ पश्यति ?

(ख) वयं प्रतिजानीमः न पुनः कदापि मांसम् स्प्रक्ष्यामः।

## खण्ड – ख

## वैकल्पिक–I
## (संस्कृतं संस्कृतिश्च)

21 अधोलिखितकाव्यानां तेषां लेखकैः सहमेलनं कृत्वा लिखत – 2

| अ | ब |
|---|---|
| (i) तदेव गगनं सैव धरा | (क) रेवाप्रसाद द्विवेदी |
| (ii) उत्तरसीताचरितम् | (ख) श्रीनिवासरथ |
| (iii) शर्मण्यदेशः सुतरां विभाति | (ग) डा. रामकरण शर्मा |
| (iv) पाथेय शतकम् | (घ) सत्यव्रत शास्त्री |

22 अधोलिखित प्रश्नान् उत्तरत –

(क) अधोलिखित संख्यानां कृते संस्कृत पदानि लिखत – 2

$10^{32}$, $10^{37}$, $10^{6}$, $10^{1}$.

(ख) वराह मिहिरः कस्य विषयस्य ज्ञाता आसीत् ? 2

तेन रचितस्य एकस्य प्रतिनिधि ग्रंथस्य नामोल्लेखं कुरुत।

(ग) धन–ऋण–गुण–विभागादीनां परिज्ञानं कस्य ग्रंथस्य मंत्रेषु उपलभ्यते ? 1

(घ) कः चरकसंहितायाः प्रणेता ? अस्मिन् ग्रंथे कति अध्यायाः सन्ति ? 2

23 अशोकस्य शिलालेखेषु कस्याः भाषायाः उपयोगः उपलभ्यते ? अस्या भाषायाः प्रयोगः कस्य महाकवेः नाटकेषु प्राप्यते ? 2

24 (क) भारतीय संस्कृतौ शरीरम् अतिरिच्य कस्य सत्ता स्वीक्रियते ? स च कीदृशः अस्ति ? 2

(ख) विद्याध्ययनसमाप्तौ कः संस्कारः भवति ? 1

(ग) शिशोः कर्णवेध संस्कारः कस्मिन् वर्षे क्रियते ? 1

## वैकल्पिक–II

## (प्रयोजनमूलक संस्कृतम्)

21 अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत – 1×4=4

(क) वैदिक शब्दानां ज्ञानम् ________ इति वैदिककोशेन सम्यक् भवति।

(ख) रामायणम् ________ संस्कृतसाहित्यस्य ग्रन्थः अस्ति।

(ग) आर्यभट्टः महान् ________ आसीत्।

(घ) संस्कृतचलचित्रं ________ इति दूरदर्शने प्रसारितम् अभूत्।

22 अधोलिखित प्रश्नान् उत्तरत – 1×4=4

(क) वर्तमानकाले दूरदर्शने प्रतिदिनं कस्मिन् समये संस्कृत वार्ता प्रसारणं भवति ?

(ख) जनसंचारस्य श्रव्यमाध्यमेषु सर्वाधिकं प्रमुखता कस्य अस्ति ?

(ग) दूरदर्शने सर्वप्रथमं प्रस्तुतस्य संस्कृतनाटकस्य किं नाम ?

(घ) संस्कृते वार्ता प्रसारणस्य अन्ते किं कथयित्वा समापनम् उद्घोष्यते ?

23 (क) संस्कृतपत्रकारितायाः व्यवसायः कीदृशः भवितुं शक्यते ? 1

(ख) विविध सेवावृत्तिकृते जनहिताय रिक्तस्थानानां विज्ञापनेन संस्कृत पत्रकारितायाः किम् उद्देश्यम् अस्ति ? 1

24 (क) देशे विदेशेवा ऐतिहासिक–प्राकृतिक स्थलानां परिचयः सम्यक्रूपेण कथं प्राप्तुं शक्यते ? 1

(ख) संस्कृत संभाषण शिक्षणाय बेंगलूरतः का पत्रिका प्रकाश्यते ? 1

(ग) प्रत्येकं राज्ये सर्वकारकार्यालये पत्रपत्रिकाणां प्रकाशनाय किम् अनिवार्यम् भवति ? 1

(घ) पत्रिकायाः प्रकाशनाय धनव्यवस्थादिकं कार्यं कः करोति ? 1

(ङ) मुद्रणत्रुटिसंशोधकस्य कृते किम् अनिवार्यम् अस्ति ? 1